# संस्कतसाहित्ये आचार्यदिगम्बरमहापात्रस्य योगदानम्

**नारायणदाशः**

०. **उपक्रमः** - १६२८ई. संवत्सरस्य जनवरीमासस्य ५ दिनाङ्के उत्कलेषु कटकमण्डलान्तर्गते वाङ्कीनगरोपकण्ठं पुरुणापाणिग्रामस्य भूसुरकुलं समभूषयत स्वजन्मना पण्डितराज आचार्यो दिगम्बरो महापात्रः। १६८६ संवत्सरे ओडिशासाहित्येकादेमीपुरस्कारेण १६६६ संवत्सरे राष्ट्रपतिसम्मानेन च सत्कतो योगजन्मा कविरयं महर्षिवेदविज्ञानविश्व–विद्यापीठे कुलसचिवपदे, राष्ट्रियसंस्कतसंस्थानस्य शास्त्रचूडामणिपदे, पाठयितुं हलाण्ड–ऋष–देशयोश्च स्थितवान्। १ महाकाव्यं, १० काव्यानि, ५ वेदान्त–उपनिषद्विषयकाः ग्रन्थाः, २ संस्कतसम्भाषण–शिक्षणग्रन्थौ तस्य प्रखरपाण्डित्यस्य मननीयकाव्यसर्जनस्य मानविकमूल्यविकासस्य च प्रमाणभूताः सन्ति। सत्यमुक्तं प्रसिद्धसमीक्षकैः प्रो. राधावल्लभ त्रिपाठिभिः –

**साहित्यस्य महापात्रे विन्यस्ते त्र दिगम्बरे।**
**दिगम्बरमहापात्र आदधाति नवं मधु।।**

अस्मिन् लघुप्रबन्धे श्रीमहापात्रस्य सष्टिसम्भारस्य रेखाङ्कनं कर्त्तुं मम समीहा वर्तते।

१. **मानससन्देशम् :-** मानससन्देशमिति कवेरस्य सन्देश–काव्यशैल्या–लिखितं १८० श्लोकसंवलितं काव्यं वर्तते, यत् नूतनभावविश्वं नीत्वा कालिदासस्य दूतकाव्यपरम्परायां खण्डकाव्यमिव सुसज्जितं वर्तते। छन्दोवैविध्यात् काव्यमिदं विभिन्नदर्शनीयस्थानानां भ्रमणसमये भिन्नतया लिखितानां काव्यांशानां सफलसंयोजनेन विनिर्मितमित्यनुमीयते। कविः भारतस्य विविधतीर्थस्थानानि भ्रमितुं स्वमानसमादिदेश। स उत्कलस्य प्रसिद्धतीर्थक्षेत्रात् श्रीक्षेत्रात् यात्रां प्रारभ्य मानससरसि स्वाप्रियया सह सम्मील्य स्वप्रयाणं समापयति। कदाचिदत्र कविः परमात्मना सह जीवात्मन ऐक्यमभिवाञ्छति। पर्यन्ते मानसहंसरूपी जीवात्मा मानसहंस्या परमात्मना सह सम्मिलति।

अत्र मङ्गलाचरणं, कवेर्मानसवर्णनं, काव्यप्रशास्ति, मानससरसः शेषांशं, कैलास–श्रीनगरयोः कियदंशं परित्यज्य अन्यत्र कविः प्रायो भारतस्य रीतिनीतिभिः, स्वभावरम्यप्रकतिभिः, समुज्जवलसंस्कतिभिश्च सुसमद्धानां तीर्थ–नदी–गिरि–दुर्ग–नगर–नगरीणां भव्यं वर्णनं प्रस्तौति।

अत्याधुनिकसमाजे पुरातन–कला शिल्प–संस्कतत्यादीनामवक्षयं प्रति नितरां जागरुकः कविः भणति–

**क्व कलिङ्गकला याताः क्व शिल्पिकुलकीर्त्तयः।**
**क्व तत्कुड्यकतं दाक्ष्यं क्व पुरा संस्कतिश्च सा।।**[1]

'चिलिका'ह्रदं कविः सागरेण मातभूमेः पादक्षालनसमये उद्धत्तं पादोदकं मनुते। वैदेशिकपक्षिणां समागमनं तेषां लीलाविलोलाः मूर्त्तीश्च कविः निपुणं निरूपयति –

**अथवाब्धिकतैःप्रमार्जनैःस्खलितंमातपदोदकं स्थितम्।**
**ध्रुवमत्र विहङ्गमैरपि ह्रदरूपं बहुभिर्विशिष्यते।।**
**क्व नु पत्ररथा विदेशिनःक्वकलिङ्गेषु समुद्रजोह्रदः।**
**दिवि सञ्चरतां विहायसां किमिहागोचरमस्ति भूतले।।**
**कलरावमुखाः पदे पदे प्रतरन्तः प्रचुराः पतत्रिणः।**
**प्रतिबिम्बितमूर्त्तयः स्वयं बहुरूपा इव भान्ति पुष्करे।**
**घननीलजले च सारसाः कलहंसा वरटास्तथेतरे।**
**रतिसारसुखा द्वयं द्वयं रममाणा विहरन्त्यनारतम्।**[2]

ततो विहारभूमिं श्लोकद्वयेन, अशोकदुर्गं च श्लोकद्वयेन वर्णयित्वा कविः श्लोकाष्टकेन प्रयागं स्तौति।

**तिस्रो मिलन्ति सरितः परिपूततोया**
**गङ्गात्विषामपतिसुता च सरस्वती च।**
**तद्धाममानसखग ! प्रणम प्रकामं**
**यत्रोढ नैकयुग-संस्कति-सम्प्रदायाः।।**
**वन्दावनेन्दु-सम-नन्दसुतस्य नित्यं**
**स्नानेन संप्रकटते यमुना सुनीला।**
**गोपाङ्गना-स्तन-निमज्जन-लब्धरागा या**
**सा सखे ! कथमहो मनसो विवर्ज्या।।**[3]

ताजमहल–सौन्दर्यमुग्धो सौ अष्टश्लोकैस्तं श्लोकस्थीकरोति –

**मुस्लीम-राजकुल-कीर्तिकलापसारं**
**विश्वे स्ति ताजमहलं महिमान्वितं यत्।**
**तत्सौधसम्भव इहास्मदुपाक्षमेव**
**सौख्याय हन्त किमतः परमस्ति भूयः।।**
**किं वा वदानि वद कुत्र कथं तदीयं**
**चित्रं चराचर-जगद्वलये मिलेद् वा।**

**को विश्वसेन्नु वत दर्शनमन्तरेण**
**तस्यातिरिक्तसुषमां वचसा प्रमेयाम्।।**[४]

ततः कविः लालकिला–पार्लिआमेण्ट–जुम्मामसजिद्–राजघाट–शान्तिघाट–विजयघाट–सुशोभितां भारतीयगणतन्त्रस्य मूर्धन्यपुरुषाणां आवासभूमिं कदाचिद्राजनीतिकलुषितां दिल्लीनगरीं द्रष्टुं मानसमुपदिशति चतुर्दशश्लोकैः –

**प्रयारि रे मानसमानदायिनीं स्वदेशिनां शासनभारवाहिनीम्।**
**स्वतन्त्रता-सारनिबन्धिनीं विशां सदैव दिल्लीं गणतन्त्रवेदिनीम्।।**[५]

२. **व्यस्तरागम् :-** व्यस्तरागमिति आचार्यवरस्य विभिन्नरागेषु व्यस्तः काव्यसंग्रहो वर्तते, यत्र चत्वारो भागाः सन्ति। सत्यं शिवं सुन्दरमिति प्रथमत उल्लासत्रयं ततश्च प्रकीर्णश्लोकानां संग्रहात्मको भागो विद्यते। सत्योल्लासे स्थिता आत्मरतिः आत्मानुरागो वा शिवोल्लासे स्वीयं शिवत्वमनुभूय सुन्दरोल्लासे प्रकतिसुन्दरं भवति। प्रत्युल्लासं विद्यते मङ्गलाचरणमेकं यस्य भावः सुन्दरोल्लासे एकीभवति।

**यन्नित्यंप्रतिभाति वाङ्मयकलाकुञ्जे ञ्जसा मञ्जुले**
**प्राज्ञो भङ्गरसज्ञ एत्य सहसा येनान्दतो दीव्यति।**
**ब्रह्मानन्दसमं पिबन्ति सुधियो यत्सारमात्यन्तिकं**
**भात्येवं शिवसत्यपूर्वमिह तत्सारस्वतं सुन्दरम्।।**[६]

वस्तुतो त्र कथङ्कारो विभागः स्वीकतो न जानाम्यहम्, यतो हि प्रत्युल्लासं तु विलसन्ति प्राकतिकं चारुचित्रं, पूर्वसूरिणां सभक्तिकं संस्मरणं, साम्प्रतिकघटनानां संघटनम्, अन्तर्मुखिनो मनसः सविलासो–पस्थापनञ्च। अतो विभागभेदः केवलं सत्यं शिवं सुन्दरमिति नाम्नः सार्थकतायै इति मे मतिः। ग्रन्थो यं १६६० संवत्सरे प्रकाशितः। अत्र १६७५ संवत्सरे लिखिता कविता पि संकलिता स्ति। इतः पूर्वं कवेः सुरेन्द्रचरितं महाकाव्यं, रङ्गरुचिरं बालकाव्यं, मानससन्देशं खण्डकाव्यं प्रकाशितान्या–सन्। तदतिरिच्य अपराभिः काव्यविधाभिः १६७५ तः १६६० संवत्सरं यावत् पञ्चदशवर्षाभ्यन्तरे लिखितानां काव्यानामयं संग्रह इति निश्चप्रचम्। अत उल्लासैः सज्जीकतेषु काव्येष्वप्यत्र कवेः विकीर्णाः भावा एव लक्ष्यन्ते। सत्यमुक्तं भूमिकालेखकेन प्रो. हरेकष्णशतपथिना –''..... अवश्यं कवेरसौ सारस्वतो रागो न कस्याञ्चनैकस्यामेव दिशि विलसति, अपितु विधिरचितं विचित्रं विक्षिप्तं सष्टिप्रपञ्चं समन्तादभिवाप्य तत्र तत्र रन्तुकामः बुभूषति।... क्व भाति भारतीय–वनवासि–निषाद–यौवतस्य निसर्गसुन्दरो नर्मालापः।

क्व चकास्ति.... पारिशदेशतरुण्या 'मनालिशा' मूर्त्तेर्मुखमण्डल–मण्डिता स्मितहास्यरेखा। ....क्व पुनरन्ता–राष्ट्रियताद्योत– को लिम्पिक–क्रीडाकौतुका ! .......एवमेव देशकालपात्रमविगणय्य कवेः सारस्वतो रागो विश्वतोमुखः सर्वत्र तनुं तन्वानः शोभते। स पुनरितस्ततो विक्षिप्तरूपः सन् व्यस्तराग–काव्यस्य नामसार्थकतां प्रतिपादयति''।[७]

सत्योल्लासे १४ काव्यानि सन्ति। तेषु श्रीजगन्नाथाष्टकम्, स्मतिरेति मां तदा, पदे मे वेपेते इत्यादिषु ईशस्मरणं कार्तज्ञपूर्वकं वर्तते पुरातनशैल्या –

**अहं वेद्मि ज्योतिः स्फुरणमिति वा तत्त्वमसि वा**
**कियत्कालं चित्ते विलसति रहः सङ्गरहिते।**
**महामायाजालं तदनु तनुते हन्त सहसा**
**पदे मे वेपेते पुनरपि तरामीह तदहो।।**[८]

जगन्नाथाष्टके आचार्यशङ्करस्य प्रभावो वरीवर्त्ति –

**न मे हव्यं द्रव्यं नहि किमपि चार्घ्यं तव कते**
**न मे यज्ञे ज्ञानं न च जपविधौ नैव नियमे।**
**न जाने ते पूजां विविधविधिना मन्त्रमहितां**
**प्रभो ! जाने मात्रं त्वदनुसरणं दुःखहरणम्।।**

(तुलनीयं–परं जाने मातस्त्वदनुसरणं क्लेशहरणम्)

**न याचे सम्भोगं न चिरमपवर्गं न च दिवं**
**दिवारात्रं याचे तव पदतले किन्तु शरणम्।**
**पुनः स्वान्तं तुभ्यं त्वदुपरचितं दीयत इदं**
**मया मायामुग्धं त्वमसि मम सर्वं हि भगवन्।।**[९]

तथैव 'प्रभो! त्वदीया स्मतिरेति मां तदा' काव्ये आङ्ग्लकाव्यच्छाया लक्ष्यते।

अपरत्र प्रकतेः चारुचित्रणं, बाल्यकालस्य गभीरां स्मतिं, शिशुचापल्यञ्च सुललितगिरा वर्णयति कविः। कदाचित् संस्कतच्छन्दोभिः क्वचिच्च उत्कलीयच्छन्दोभिः –

**ग्राम-पाठशाला, कूपोदकं कथं,**
**सुस्वादु शीतलं जलम्।**
**गुरोर्वेत्राघातस्ततो धिकतरः**
**शीतलो बहुनाप्यलम्।।...**
**वद्धा मातामही मातुत्सङ्गे, नीत्वा -**

**कथयदनल्पाः कथाः।**
**वद्धासुरी तुङ्ग-पादपे वसति**
**उच्चैर्विहसति तथा।।**[१०]

अत्र उत्कलीयच्छन्दसां पादान्तयतिः (अन्त्यानुप्रासः) स्मरणीया एव।

**स्मरति मधुरं मधुरं पिष्टकम्,**
**मातुलालयस्य चित्तम्।**
**स्मरति प्रान्तरे पदकन्दुकञ्च**
**कदापि मस्तकोत्थितम्।।**
**कदाचित् रमते निर्जने वने**
**पिबति निर्झरे सलिलं सुखम्।**
**कदापि प्रयाति पर्वतोपरि,**
**कदापीच्छति नन्दनम्।**
**चुम्बति मनां मम मातभुवम्,**
**यथा रुचिः पुनःपुनः।**[११]

तदतिरिच्यात्र वर्णनप्रसङ्गे उत्कलीय–महाकवेः सारलादासस्य, चाणक्य–महावीर–गौतमबुद्ध–मुञ्जनरेश–प्रभतीनामैतिहासिक– पुरुषाणां पावनी गाथा पि संकलिता स्ति।

शिवोल्लासे विलसन्ति पञ्चदशकाव्यानि विविधभावसंवलितानि। एतेषु साम्प्रतिकयुगस्य सामाजिक्यः समस्याः वक्षरोपण–विज्ञानजययात्रा–यौतुकादयः सम्यक् आलोचिताः सन्ति। तन्मध्ये क्षेपकवद् यदाधारा गिरो भान्ति, आध्यात्मचिन्तनं च प्रक्षिप्ते। अपरकाव्येषु च नारीणां दशासमस्यादिविषये विवेचना लभ्यते। एतदतिरिच्यात्र साहसिकानां कलिङ्गानां यशोवर्णनं, सागरयात्रा च लभ्यते। विशेषतः अत्र स्वीकता प्रहेलिकाविधिरत्युत्कष्टा भाति। स्वल्पशब्दैः निस्सीमभावप्रकाशनाय यथा डॉ. हर्षदेवो माधवो जापानदेशीयां हायकूशैलीम् उत्तरकोरियादेशीयां सीजोशैलीं संस्कतकाव्ये स्वीकरोति, तथैवात्र आचार्यश्रीः उत्कलीयां प्रहेलिकाशैलीमनुहरति या हायकूशैल्याः समीपवर्तिनी वर्तते। हायकूमध्ये पादत्रयं भवति, प्रतिपादं क्रमशः ५, ७, ५ अक्षराणि भवन्ति। प्रहेलिकायान्तु त्रिषु पादेषु यथाक्रमं ८, ११, ८ अक्षराणि भवन्ति। उदाहरणानि यथा – हायकू–**अब्धौकौमुदी, ऋषेःक्षुब्धे चेतसि, मेनकाच्छविः।**
प्रहेलिका – रोदितिरहो दुहिता,

**सदने जननी सदा चिन्तिता, एष्यति कदा जामाता।** शैलीयमुत्कलेषु एका लौकिकी शैली वर्तते, यत्र नर्मगर्भव्यङ्गेन सह स्वकथनं गीतिकारः स्वयं गायति, लोकनत्यादिस्थलेषु। शबर–शबरी–नायक–नायिकानां व्यङ्गप्रधाना कथोपकथनशैली अत्र समादता भवति। अनया शैल्या समसामयिकविषयान्विषयीकरोति कविः। 'यथा ते रोचते' शीर्षके ४२ प्रहेलिकाभिः, 'विदुषकौ' शीषके २० प्रहेलिकाभिः अस्योल्लासस्यार्धाधिको भागः प्रसिद्धश्लोकांशैः दन्तकथाभिः पौराणिकोपाख्यानैः सामाजिक–समस्याभिश्च परिपूर्णो स्ति। राज्यस्य भाषा–संस्कति, रीतिनीतिः, कविलेखन्याः दूरे नास्ति।

**वारि नास्ति वारिवाहे, जामाता भवति पलितकेशः,**
**कुमारी क्रन्दति गहे।**
**सुत एक एका सुता, जन्म निषेधतः शिवपार्वती,**
**न पुनः सुतो भविता।**
**प्लवते सागरे पोतः, तीरे सार्थवाहतरुणी वदति,**
**क्व गतः कलिङ्गसुतः।**
**कोमले तरुणीकरे, धरते नाविकः प्रयातुकामः,**
**कलिङ्गसागरकूले।**
**अशोकवने जानकी, शोकोच्छ्वासमनाः क्रोशति सती,**
**विपदः को वा रक्षति।**
**असिते यमुनाजले, मज्जति लज्जया राधिका हन्त,**
**हसति केशवः कूले।**
**अग्निरस्ति पुरः साक्षी, त्वमद्यप्रभति मम धर्मपत्नी,**
**विभर्मि चिरं ते रक्षी।**
**तथापि न सा स्वतन्त्रा, सदा निर्भरन्तीतरेषु लोके,**
**कवितावनितालताः।**
**स एव कुत्सितो नरः, याचते यो धनं कन्यापितरं,**
**ततः को स्ति नीचतरः।**
**दानं तु दातुरायत्तं, विवशं यौतुकं सदा गर्हितं,**
**परिण्ये कलङ्कितम्।**[१२]

एतदतिरिच्य कविरत्र क्वचित् वनस्पतिकुलनाकं सावधानं करोति, क्वचित् विज्ञानस्य जयघोषं करोति, क्वचिच्च स्त्रीकुलस्य यशः स्मरन्ति। यथा –

**रे रे धुनातनजनाः परुषाभिमानाः**
**सन्मार्गतः स्खलत मा खलु सावधानाः।**
**सद्यो वनस्पतिकुलं सुखशान्तिदायि**
**मा नाशयामितहितं विदधज्जनानानम्।।**
**आकाशयानमभियाय मनोजबेन**
**छायापथं प्रविदधाति विचित्रकर्म।**
**चन्द्रे पुनः प्रविशति स्वयमेव मर्त्यो**
**विज्ञानमद्य किमुहो न करोति बन्धो।।**
**स्त्रीपुंसावधिकत्यैष समाजः प्रणिगद्यते।**
**नश्यत्येकेन हीनो सौ पक्षी पक्षं विना यथा।।**
**पुरुषस्य पुरो भाति पूर्वाह्णे नुयात्येषा सखी**
**अपराह्णे नुयात्येषा किङ्करीव कुटुम्बिनी।।**[१३]

स्त्रीदुःखं सम्यक् वर्णितं 'ननु राष्ट्रे स्वतन्त्रे पि न स्त्री स्वातन्त्रयमश्नुते' काव्ये। उल्लास–शेषमङ्गलं स्त्रीयश एवोद्घोषयति –

**स्त्रीजातेः परिवध्यतां सुमहती भव्या प्रतिष्ठा भुवि**
**क्रान्तिःकान्तिरपार्थिवातिरुचिराश्रीःशान्तिरुक्तिःस्थितिः**
**स्वातन्त्र्यं च समश्नुतां सममसौ पुंसा समस्याभता**
**शीलं सञ्जयतूज्वलं च भुवने जीयाद्यशो योषिताम्।।**[१४]

सुन्दरोल्लासस्थेषु १३ काव्येषु कविः गहस्य बाल्यस्मतितः छविलां वसुन्धरां, अलम्पिकक्रीडां, मनालिसाहास्यं यावद् वर्णयन् स्वीयाधुनिकत्वं प्रतिपादयति। अलम्पिकस्य निर्वचनमतिसुन्दरं भाति – न लिम्पः अलिम्पः अकलुषः। स्वार्थे कः अलिम्पक इति।

**अलिम्पकक्रीड इह प्रवर्तते**
**भुवि प्रधानः सहयोगवर्धकः।**
**सुसंहतो विश्वजनैश्च सम्मतः**
**क्रीडन्ति यत्र प्रमुखा युवब्रजाः।।**[१५]

'विधिना विनिर्मितं काव्ये' ३२ श्लोकैः रचिता रम्या प्रभातवर्णना। वाताहवाया पद्मिन्याः कम्पनं तस्याः रोषं मनुते कविः –

**कथं नु राधाधरपायिकष्णवद्**
**भवामि हे यो ह मयि प्रिये ! वद।**
**इति प्रशंसामलिनायकस्य सा**
**निषिध्य रोषेण विकम्पते किमु।।**[१६]

निषादसङ्गीतकाव्ये प्रणयियुगलकलहस्य प्रासः अनुप्रासायते[१७]–

**भ्रमतो न हि रे भ्रमरा भ्रमत मधुरं मधुरं मधु संपिबत**
**वितते गगने विधुरःस विधू रमते च कया वदत वदत।**
**अयिमोदमदा रसदाःप्रमदाःपरिनत्यत रे थमुदापरितः**
**तमसा वितते नभसि क्षणदा कमिहेच्छतिवावदत वदत।।**

किमतः परं स्यात् काव्ये नत्यनाटिकारूपेण पद्यात्मकैः लौकिकच्छन्दोभिः अभिज्ञानशाकुन्तलस्य शकुन्तलायाः पतिगहयात्रां यावत् विषयस्य पुनर्विन्यास आमोदकर एव।

३. **अद्वैतबोधविवेकः** - कश्चन दार्शनिकः कविर्भवतु वा न भवतु, परन्तु कश्चन कविरवश्यं दार्शनिको भवति। तेन च स सत्यशिवसुन्दरस्य पन्थानमनुसरति। तथैव कवेः दिगम्बरमहापात्रस्य मनोमयकोशे अद्वैतवेदान्तमाश्रित्य अवस्थितः ज्ञानराशिः 'वेदान्तवार्तिकम्' नाम्ना गद्याकारेण प्रकाशितमासीत्। तस्य ज्ञानपुञ्जस्य काव्यिकफलश्रुतिर्भवति 'अद्वैतबोधविवेकः' इति दार्शनिकं काव्यम्। गद्यगुम्फनश्रान्तः कविः अतिसरलच्छन्दोभिः सुन्दरभाषया च गम्भीरं दार्शनिकमपि विषयं निपुणं वर्णयति। सो हं स्वरूपप्रतिपादने कविर्यथा –

**अहं कोटिजन्मान्तरप्राप्तसाक्ष्यं स्वयं स्वान्तवेद्यं सदानन्दरूपम्।**
**समीक्ष्याभिजाने तदेति स्वरूपं परब्रह्मरूपं परं पूर्णतरस्तत्।।**[१८]

अयं ग्रन्थः पूर्वार्ध उत्तरार्धश्चेति द्विधा विभक्तः। पुरोवाचि कविः स्वयं प्रतिपादयति यत् ग्रन्थस्य उत्तरार्धः पूर्वं लिखित आसीत्। अतः क्वचित् पूवोर्धे उत्तरार्धविषयाणां पूरणात्मकं पुनरावर्तनम् असहजबोधश्च परिलक्ष्यते। को हं तः काव्यं समारभ्य ग्रन्थकारः सो हं दशायां विरमति। अतः को हमिति जिज्ञासायाम्, आत्माभिमाने, चित्तसंस्कारे, आत्मोपलब्धौ च विषयसाम्यं पूर्वार्धे उत्तरार्धे च लक्ष्यते। संपूर्णे ग्रन्थे सरलच्छन्दोभिः अद्वैतवेदान्तस्य सारः संगहीत इति कथयितुं शक्यते।

पूर्वार्धे प्रायः अनुष्टुभिः १८५ श्लोकैः (१,२,६,१५२,१५५–५७,१६२, १६४–७१,१७३,१७४ विहाय) बोधजिज्ञासा, आत्माभिमानिता, पश्चात्तापः, विवेकोदयः, सत्त्वशुद्धिः, भावशुद्धिः, चित्तसंस्कारः, आत्मबोधः, अविद्या–अज्ञान–क्षये अद्वैतबोधादिविषयाः सन्निवेशिताः सन्ति।

उत्तरार्धे विविधच्छन्दोभिः (१२–४०,५२–५७,६०–६७,७०–७६,७८–८३, ८७–६५,६७–१११, ११३–१३० अनुष्टुभः) को हमिति जिज्ञासा, प्रवत्ति–

निवत्ति–चित्तचाञ्चल्यम्, अहङ्कारः, बुद्धिः, प्रकतिपुरुषौ, क्लेशच्छेदः, माया, जीव–आत्म–स्वरूपमुपाध्यश्च, सो हं स्वरूपञ्च वर्णितानि सन्ति।

दार्शनिकः कविर्गम्भीरं दर्शनविषयमपि अनुष्टुभिः सरलभाषया सुन्दरशैल्या च निबध्नाति। को हम् अनुयोगो यथा[१९] –

**को हमित्यनुयोगाद्धि जायते हं कतस्थितिः।**
**अहङ्कारं समाश्रित्य व्याप्तमस्ति यतो जगत्।।**
**किं तावत्परितोम्बरं सुवितत‌ं वातः कुतो वाति वा**
**तेजस्तीक्ष्णतरं कुतः क्षरति वा को यं नु तोयस्रवः।**
**ध्यायं ध्यायमिदं विचित्रमधिकं लोके तथैवेतरत्**
**कौ हं कौ हमिहेति चिन्तितमना जाने न जाने थवा।।**
**योषा जोषमुपैति नाथमतकं हित्वापि हार्दातुरा**
**पुत्रो रौतिकियत्क्षणं प्रियसखाः संवेदयन्ते क्वचित्।**
**शोचं शोचमिदं हि जीवितमहो व्यर्थं पयःफेनवत्**
**स्वान्ते मे तत एति हन्त सहसा को हं नु को हं क्वभो।।**

उत्तरार्धे काव्यिकच्छटा दर्शनविषयमधिकं रसाप्लुतं करोतीत्यनुमीयते। अत्र उपशीर्षकनामानि अपि छन्दोबद्धानि लभ्यन्ते। यथा–उपाधिभेदःकथमात्मनः स्यात्, उपाधयो न्ये निरुपाधिरन्यः, क्लेशच्छेदो स्तु सर्वथा, बुद्धिः सा निश्चयात्मिका, अहङ्कारः स विज्ञेयः, चित्तचञ्चलता हेया, प्रवत्तिश्च निवत्तिश्च, अनुयोगः पुनः पुनः....। मायास्वरूपं यथा –

**यथैव छत्रं लघु मस्तकोपरि**
**निगूहते सूर्यमशेषविग्रहम्।**
**तथाल्यमात्रं खलु भोगसाधनं**
**स्वरूपबोधे भवति प्रबाधम्।।**
**कादम्बिनी दिवि यथा  वणुते र्कदेवं**
**लोकस्य लोचनपथाच्च सहस्ररश्मिम्।**
**माया तथैव परिसंवणुते परेशं**
**व्याप्तस्वरूपमपि सत्यमनन्तमेकम्।।**[२०]

नेति नेति कत्वा आत्मन उपाधिभेदवर्णनं चमत्कारं जनयति –

**नाहं नक्षत्रपुञ्जो यो दश्यते क्ष्णा ख एव च।**
**नाहं नेत्रेण वा दश्यं चक्रवालं च सर्वथा।।**
**नाहं कलयिता कालः संसतेः संस्थितेस्तथा।**

**यो विच्छेदमवच्छेदं द्वयं वा  प्नोति वस्तुतः।।**
**तदोदीरयते योगी प्राप्य स्वरूपमात्मनः।**
**अहं ब्रह्म जगन्मिथ्या जीवो ब्रह्मैव नापरः।।**[२१]

अद्वैतस्वरूपं कविः सम्यक् निरूपयति–

**प्रजागर्त्ति यावच्चला चित्तवत्तिः**
**समायाति कामः स्फुरत्सङ्गसौख्यः।**
**सदानन्दरूपे स्वरूपे प्रबुद्धे**
**क्व बाञ्छा क्व काया क्व माया क्व छाया।।**
**न पुत्रो न भार्या न माता न पिता।**
**न प्रपञ्चेषु बाञ्छा कदाचिन्न मेस्ति।**
**स्वरूपं तदेवात्मनि व्यक्तमच्छन्**
**ब्रवीमीति नित्यं त्वमेवासि सत्यम्।।**[२२]

गुणभेदविमर्शे, सत्त्वभावचित्तसंस्कारे, साम्यकथने, अद्वैतबोधविमर्शे, ग्रन्थकारस्य शैली श्रीमद्भगवद्गीतामनुहरति। यथा– ज्वलन्त्येकस्य दीपस्य योगतो नेकदीपकाः, आत्मनौ शास्तथा भान्ति ह्येकस्यैव परमात्मनः।

**ततो ध्यानं ततो ध्यानं ततो भानं निरन्तरम्।**
**ततो ज्ञानाम्बुधौ स्नानं समाधिर्वा विकल्पकः।।**
**भोगाय बहवो भक्ता भजन्ति पश्चिमां दिशम्।**
**समीप्सन्ति भवे चैके चाकचक्यं नवप्रभम्।।**[२३]

ग्रन्थस्य भरतवाक्यात्मकं सो हमिति भावः प्रसरतु सर्वत्र इत्याशा कवेः[२४]–

**यत् सर्वत्र समं विकाररहितं सच्चित्स्वरूपं परम्**
**ब्रह्माद्वैतमनन्तधीप्रतिनिधि ज्ञानैकनिष्कर्षकम्।**
**ध्यायं ध्यायमशेषमात्मपरमं ज्योतिः प्रकर्षं हि तत्**
**सो हं सो हमिति स्फुरत्यनुपदं स्वान्ते ममातः स्वतः।।**

वस्तुतः समर्थः कविः गम्भीरविषये पि नूतनभङ्गिभणित्या जाग्रच्चमत्कारं स्रष्टुं प्रभवेदित्यतः प्रमाणितं भवतीति दिक्।।

४. **सुवर्णवङ्गम्** -सदाजाग्रतः कविः सर्वदा राष्ट्रियस्तरे अंतर्राष्ट्रियस्तरे वा जागरुको वर्तते। विश्वभ्रातत्वभावना, उच्चकोटिको देशात्मबोधो जातीयसंहतिश्च तस्य काव्यस्य प्रेरणास्रोतांसि सन्ति। तादशादर्शबोधे पञ्चसर्गात्मकमिदं सुवर्णवङ्गमिति काव्यं २६४ श्लोकैः वङ्गबन्धोः मुजीबरस्य त्यागपूतं जीवनचरितं विषयीकरोति। तेन भारतदेशस्य

उदारां वैदेशिकनीतिं शान्तिपूर्णां सहावस्थाननीतिं च कविः यत्र तत्र वर्णयति।

**नीतिः शुभा भवति भारतमातुराढ्या**
**दष्टिर्बहिर्हिमवतो हिमवत्प्रशान्ता।**
**कान्ता कला च कलिता विधिनास्ति यस्यां**
**गाङ्गेयवङ्गजननौ प्रणतो स्मि तस्याम्।।**
**ते सन्तु हिन्दव उत क्वचिदीशभक्ता**
**भक्ता भवन्तु यवना अथवा खुदायाः।**
**ते मानवाः क्षितितले सदसद्विवेक-**
**प्रज्ञा हि सत्यमिति चेत् किमतः परं स्यात्।।**[२५]

प्रथमसर्गे कविः वङ्गभूमेः भारतीयसंस्कतेः, उभयदेशयोः सहावस्थानस्य चित्रमुपस्थाप्य शेखमुजीबररहमनमहोदयस्य साङ्गठनिककौशलं वर्णयन् देशमातकायाः स्वतन्त्रतायै प्रचोदयति–

**अभाषतासौ मतिमान् स्वलोकान्**
**वयं सदा सङ्घटिता भवेम।**
**उद्देश्यसिद्धिर्भुवि सङ्घशक्त्या**
**भविष्यतीति प्रवदन्ति विज्ञाः।।**
**पवित्रवातामतसेवेन**
**श्वसाम आजन्म वयं च यस्याः।**
**सा राष्ट्रमाता यदि न स्वतन्त्रा**
**स्थितिः क्व नो स्तीति विचार्यमेतत्।।**[२६]

द्वितीयसर्गे १६७१ संवत्सरे साधारणमतदानावसरे आवामीलिग्– दलप्रतिनिधेः मुजीबरस्यविजयः पाकिस्थानीयशासकानामीर्ष्या, वङ्गीयानामान्दोलनम्, पूर्ववङ्गस्य सर्वविधस्वातन्त्र्यविषये मुजीबरस्योद्बोधनं, पर्यालोचनं, मुक्तिवाहिन्याः गठनम् प्रबलयुद्धः, मुजीबरस्य बन्धनम्, भारतस्य विपक्षे पाकिस्तानस्य युद्धघोषणादिविषयाः वर्णिताः सन्ति।

**ज्वलदग्निसमो वङ्गे विप्लवः प्रोद्गतो महान्।**
**भुटो-खाँवर्ययोदुर्गं चकम्प इति शङ्कितम्।।**
**प्राणान् वा पातयेत् कार्यं साधयेद् वा सुनिश्चिता।**
**वाहिनीति धिया भ्ययाद् युद्धाय कतनिश्चया।।**[२७]

ततीयसर्गे मुक्तिवाहिन्याः पराजयः, पाकसैनिकानामत्याचारः, वङ्गीयानां भारते शरणभिक्षा, भारत–पाकिस्तानयुद्धं, भारतस्य प्रत्याक्रमणं, पाकिस्तानस्य पराजयश्च वर्णिताः सन्ति।

**नभो-दिगन्त-प्रणिमादचञ्चुरा**
**वभुर्दुराचारपराश्चमूचराः।**
**ततान सर्वत्र विभीषिका भशं**
**श्मशानभूमिष्विव राजवर्त्मसु।।**
**क्वचित् पतीनां खलु पश्यतां स्त्रियो**
**बलाद् गहीताः परिपन्थियोद्धभिः।**
**क्व भुक्तमुक्ताः कतिशश्च विद्रुताः**
**क्व हन्त तासां गणना च का थवा।।**
**स्वभावतो भारतमातुरादरः**
**सुवर्णवङ्गं प्रति पीवरायते।**
**परो पि पुत्रीकुरुते कथं न को**
**विपत्तिकाले शरणैषिणं जनम्।।**
**मुखामुखि व्योम्नि विमानसङ्घयो-**
**र्बभूव सङ्घर्ष उदात्तघोषयोः।**
**रणे स्फुरद् बह्निकणोत्करो महान्**
**दिगन्तविस्तार्य्यतिमात्रभीषणः।।**
**मुहुश्च बम्बारवभैरवं नभः**
**प्रकम्पमाप स्फुटमुत्तरोत्तरम्।**
**धरा म्बरं वा म्बरमागतं धरा**
**कथं गिरा कस्तदुदीरयेदहो।।**[२८]

चतुर्थसर्गे मुजीबुरस्य कते मत्युदण्डादेशं श्रुत्वा तस्य आत्मगौरवलाभः, कथञ्चिन्मुक्तः मुजीबरः ब्रिटेनदेशं गत्वा ततः भारतं प्राप्य राष्ट्रियसंवर्धनां प्राप्य स्वदेशं प्राप्तवान्। ‘कारा कथं मे प्रतिबन्धिनी स्यात्’ इत्यस्य समस्यापूर्तिपरकाः पञ्चश्लोकाः मुजीबरस्य गभीरामात्मसमीक्षां वर्णयन्ति–

**देहं मदीयं लयमाप्नुयाद् वा**
**लभेत सन्तोष मरिष्यतो वा।**
**विदुर्यदीदं वचनं च लोकाः**
**कारा कथं मे प्रतिबन्धिनी स्यात्।।**

**पदे-पदे भारतवङ्गयोः सत्-**
**सादश्यमस्ति व्यवहारभूमौ।**
**प्रमाण्यते सैव विपत्तिकाले**
**सुसङ्गतिर्नो न्तरसाक्ष्यवेद्या।।**[२९]

पञ्चमसर्गे वङ्गबन्धुं प्रति जनानां सम्माननं, राष्ट्रपतिपदे मनोनयनं, स्वानुभूतिकथनं, हुतात्मनां प्रति संवेदनाज्ञापनं, भारतस्य प्रशस्तिगानं, स्वकुटुम्बेन सह मेलनं वर्णितानि सन्ति।[३०]

**क्षणहर्षविलासमञ्जुला नगरी नाथवतीव शोभिता।**
**कुसुमप्रकरैः सुसज्जिता बहिराढ्या तितरामदश्यते।।**
**मम राष्ट्रमतीव मे प्रियं नहि सादश्यमनेन भूतले।**
**अहमामरणं च तत्पदं ह्यनुयास्यामि चिरोपचारकः।**
**क्वगता भगिनीगणाश्च ताःपशुघातं निहता द्विषांकरैः।**
**निजमातविमुक्तये कथं ननु तासां रुधिरं वथा भवेत्।।**
**हतबन्धु-समाधि-सङ्कुले खलु मञ्चे वयमेव नायकाः।**
**नव-नाटक-नीति-कल्पनां बहुचित्रां सुखमारभामहे।।**

पञ्चसर्गात्मकमपि काव्यमिदं छन्दो लङ्कारभाषाभावादि–दष्ट्यात्युच्चकोट्याः वर्तते। जनस्य स्वाधीनतास्वाद इत्थं वर्णितः कविना–

**जन्मतो मत्युपर्यन्तं मुक्तिमिच्छन्ति जन्तवः।**
**सुखाय कल्पते स्वैरं दुःखाय परतन्त्रता।।**
**स्वमातपादाम्बुजरेणुसेवा**
**यदीह मे शीर्षविलावहेतुः**
**अस्तीतरद् वा किमतो वरीयः**
**शिरः प्रदेयं ह्युपवर्त्तनार्थम्।।**[३१]

गणतन्त्रे जनताजनार्दनस्य महत्त्वं यथा[३२]

**लभते बहुमानमेव तत् प्रबलं लोकमतं महीतले।**
**प्रणमाम्यत आदरादहं सततं तं जनताजनार्दनम्।।**
**मम वङ्ग उदारहृत्पुरः प्रतिभातीव सुवर्णसम्भतः।**
**अहमस्मि तदीयपुत्रकः प्रतिगेहं वचनेस्थितश्चिरम्।।**

कदाचित्कीं मुद्रात्रुटिं विहाय (प. ३१, श्लो. ४५), कठिनपदार्थयुक्तं, पथक्तया सुभाषितावलीसंवलितं काव्यमिदं पाठकीयादरम् अंतार्राष्ट्रियां ख्यातिं च प्राप्य सुखपाठ्यं वर्तते।।

५. **वेदान्तवार्त्तिकम्** - वेदान्तवार्त्तिकमिति ग्रन्थ आचार्यवर्यस्य दार्शनिको ग्रन्थो वर्तते। शीर्षकादेव ज्ञायते यदत्र वेदान्तविषयो वर्णितो स्ति अथवा वेदान्तविषयस्य पूरकात्मको गद्यात्मको वा स्यात्, यो मूलविषयमुपवहृणाति। केवलं वेदान्तमवर्णयित्वा ग्रन्थकारः प्रसङ्गे प्राप्ते सति षड्दर्शनानां विषयमपि विशदीकरोति। यथा महामायायाः निर्वचने सांख्यमतम्–'...अनन्तशक्तिः अनिर्वचनीया महामायेति च निगद्यते....।'' तथैव सष्टिक्रमे अन्धपङ्गुन्यायेन प्रकतिपुरुषयोः वर्णनं, ईश्वरस्वरूपवर्णनं, स्वरूपानुभूतिप्रसङ्गे, योगशास्त्रस्योदाहरणानि अपि सन्त्येव। ''....तदैव निर्विकारे चित्ते चितिशक्तेः स्वरूपप्रतिष्ठा द्रष्टुः स्वरूपे वस्थानं वा भवतीति योगशास्त्रे पि प्रपञ्चितमस्ति।'' [३३] एतदतिरिच्य ब्रह्मसूत्र–विवेकचूडामणि–आध्यात्मोपनिषद्–तेजोविन्दूप–निषद्–पैङ्गलोपनिषद्–कठोपनिषद्–श्वेताश्वेतरोपनिषद्–अपरोक्षानु–भूति– पञ्चदशी–श्रीमद्भगवद्गीता–दग्दश्यविवेक– आत्मबोधादि–दार्शनिकग्रंथेभ्यः प्रदत्तानि उदाहरणानि, स्वीकताः पादटीकाश्च ग्रन्थगौरवं वर्धयन्ति। दर्शनस्य गम्भीरविषयमपि लेखकः सरलभाषया पाठकानां पुरतः समुपस्थापयति। यथा – ''पङ्गुः चलितुं स्वभावेन अक्षमो पि चलनशक्तियुक्तस्य अन्धस्य स्कन्धे समारोपितां गन्तुं प्रभवति। किन्तु अन्धो द्रष्टुमक्षमो पि स्वस्कन्धस्थितेन पङ्गुना प्रदर्शितेन मार्गेण स्वयं चलितुं प्रभवति। अत्र यथा द्वयोः संयोगः उभय–गमन–दर्शन–रूप–क्रियासिद्धये सर्वथा कल्पते। तथैव जडचेतनभूतयोः प्रकतिपुरुषयोः संयोगः सर्गोत्पत्तये हेतुः भवति...।''[३४]

ग्रन्थे स्मिन् त्रयः परिच्छेदाः सन्ति। प्रथमपरिच्छेदे दुर्लभमान–वजन्मनः अनन्तसम्भावनाः, शरीरसष्टिप्रक्रिया–पञ्चकर्मेन्द्रियाणि–पञ्चज्ञानेन्द्रियाणि–पञ्चवायवः–अन्तःकरणचतुष्टयम्–स्थूलसूक्ष्मकारण–

शरीराणि–अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशाः–जाग्रत्स्वप्न–सुषुप्तिमूर्च्छामरणावस्थाः – सष्टिक्रम–माया–अविद्या–ईश्वर–जीवानां स्वरूपं भेदाश्च वर्णिताः सन्ति। अयं भागो ग्रन्थस्य पूर्वपीठिकां प्रस्तौति।

द्वितीयपरिच्छेदे मुख्यतया साधनोपायाः वर्णिताः। अत्र श्रवण–मनन–निदिध्यासन–समाधि–अभ्यास–उपरति–अध्यास–आसक्ति–प्रारब्ध – पादचतुष्टय–उन्मेषनिमेष– अविद्याबन्धश्च प्रमुखविषयाः सन्ति। एषु

ब्रह्मणः पादचतुष्टयम् (अविद्या, सुविद्या, आनन्दः, तुरीयः), उन्मेष–निमेषादिविषयाः वेदान्तसारादिसाधारणवेदान्त–ग्रन्थेषु अस्पष्टाः सन्ति। वार्त्तिककारो यं तानपि स्पष्ट्वा स्वप्रागल्भ्यं प्रमाणयति।

ततीयपरिच्छेदे सष्टितत्त्वम्, ब्रह्मणः स्वरूपम् (साकार–निराकार), विद्या विद्ये, महामाया, कर्मफलम्, वासना, प्रवत्तिः, बन्धनम्, अध्यारोपापवादौ, महावाक्यविचारादि–विषयाः चर्च्चिताः सन्ति।

सम्पूर्णे ग्रन्थे सावलीलभाषाप्रयोगः, ग्रन्थान्तरं सन्दर्भश्लोका–नामुद्धरणम्, समद्धा पादटीका च ग्रन्थकारस्य महत्त्वं वर्धयन्ति। प्रतिविषयं ग्रन्थकार उदाहरणानि रेखचित्राणि च प्रस्तुत्य क्लिष्टं दार्शनिकं विषयं यथासाध्यं सरलीकरोति। किन्तु त्वरावशात् जातं मुद्रास्खलनं न केवलं वत्तौ अपितु पादटीकायामपि विषयावगाहनं शिथिलयति। स्थालीपुलाकन्यायेन किञ्चित्–बुद्धि र्यदा (प. ७), ज्ञातज्ञोयं (प.७), सुखधुःखादीनां (प.११), अवरिष्ठते (प.१३), तशान्तरं (प.१६), मोज्ञेच्छा, तेहिनः (प.१६, पादटीकायाम्) इत्यादि। पुनश्च ४८ पष्ठायाः पादटीका भ्रमवशात् ४७ पष्ठायां प्रदत्ता, यदि च ४७ पष्ठायाः पादटीका ग्रन्थे एव नास्ति। एतदतिरिच्य साधारणं बन्धनं, शोभनं मुद्रणं धारयित्वापि ग्रन्थरत्नोयं स्वसकलविषयावगाहिविषयत्वेन पाठकानां सुखबोधाय स्यादिति मदीया समीहा।

६. **दुर्नीतिपुराणम्** - महापात्रस्य दिगम्बरस्य पुराणकाव्यं भवति दुर्नीतिपुराणम्, यत्र कविः सप्तभिः अध्यायैः अनुष्टुप्प्रायैः ३१४ श्लोकैः दुर्नीतिग्रस्तानां भव्यं वर्णनं कत्वा दुर्नीतिनिवारणोपायं तस्याः मूलञ्च साङ्गोपाङ्गं वर्णयति पार्वतीशङ्करसंवादैः। पुराणं पञ्चलक्षणमित्यादिलक्षणैः पुराणमिदं सर्वथा न लक्षितम्। कदाचित् लोकानुचरितवर्णनात्मकमेकमेव लक्षणमत्र संगच्छेत्। सांप्रतिक–साहित्ये व्यङ्ग्यात्मकभङ्गिभणित्या रचितं काव्यं पुराणपदेन व्यपदिश्यते। तादशशैल्या अतिमनोज्ञप्रश्नोत्तरच्छलेन विरचितमिदंचारुतरं काव्यं, यस्य मङ्गलाचरणे एव कविः दुर्नीतिदेवतां स्तौति –

**यत्रो नेतगिरो वेदा यत्र धर्मो तिवञ्चना।**
**यत्र विद्या प्रियाप्रीतिस्तस्यै दुर्नीतये नमः।।**
**यत्र मन्त्रिपदं स्वर्गो यत्र रामावचः सुधा।**
**यत्रार्थसञ्चयः पुण्यं तस्यै दुर्नीयते नमः।।**[३५]

प्रथमे ध्याये ६७ श्लोकैः पार्वत्याः दुर्नीतिविषयिणीं जिज्ञासां श्रुत्वा तस्याः सर्वव्यापकत्वं, दुर्जनैः नेतभिश्च सह तस्याः सम्बन्धः, आधुनिकनेतणां लक्षणं स्वरूपं फलञ्च सम्यक् वर्णितानि सन्ति। दुर्नीतिः न केवलं जनमानसे परिव्याप्ता, अपि च जले स्थले सर्वत्र।

**जले स्थले तथा वाते श्वासप्रश्वासयोर्नणाम्।**
**आतेःप्रोततया सा स्ति सर्वत्र जनमानसे।।**[३६]

तस्याः मूलोत्पाटनं सफलेन नेत्रा एव करणीयं वर्तते। तदर्थं जागरुकेन भाव्यम्[३७] –

**राष्ट्रसञ्चालको नेता भवेत् सदा चरित्रवान्।**
**शिक्षणीयाः कथं किं वा न्यथा स्युः सकलाः प्रजाः।।**

भ्रष्टनेतृणां स्वरूपं निपुणं निरूपयति कविः –

**नमन् निर्वाचनात्पूर्वं सम्भाषत उदारवत्।**
**परं तदनु यो भिन्नः स नेतेत्यभिधीयते।।**
**नेता समाजे चतुरो भिनेता**
**प्रतिश्रुतेः सर्वजनाय दाता।**
**सभासु भातीव महान् प्रवक्ता**
**धाता पुरश्चेति भुवि प्रजानाम्।।**[३८]

कर्त्तुमकर्त्तुमन्यथाकर्त्तुं स एव समर्थः। तस्य प्रभावेण घोरकलिकाले क्वचित् वको हंसायते, हंसश्चान्यैः हिंस्यते। यथोक्तं कविना –

**दारिद्र्यं घटते हन्त धनाढ्यः सुदढायते।**
**विलासभवने क्वापि मदिरा निर्झरायेते।।**[३६]

द्वितीये ध्याये कविः स्वर्गपुरे देवानां राजनीतिं, देवानां मर्यादां, दुर्नीतिग्रस्तानां देवपूजनञ्च सम्यक् उपश्लोक्य दुर्नीतिनिवारणे संहारकारिणः शङ्करस्यापि असामर्थ्यं प्रपञ्चयति। स्वयं शङ्करः स्वीयमसामर्थ्यमेवं वदति –

**काले हं संहरिष्यामि प्राणिसामान्यमीश्वरे।**
**सतणं सकलं लोकं केवलं नहि दुर्जनान्।।**[४०]

ततीयाध्याये दुर्नीतिग्रस्तानां विचारहीनतायाः हेतोः भारतस्य गौरवहानिः, गुणाभावात् अभिमानिनां प्रभावः, अयोग्यानां प्रादुर्भावादिविषयाः निरूपिताः सन्ति। सुमिष्टं रसगोलकं मत्वा अयोग्याः प्रभुत्वं कामयन्ते। तेन ते परिहसिताः भवन्ति नूनम् –

**प्रभुत्वं न मनाक् काम्यं सुलभं येन केनचित्।**
**न विचार्यञ्च तज्जातु सुमिष्टं रसगोलकम्।।**
**अयोग्यो जन आधत्ते धिकारञ्चेत् समाकुलः।**
**स परिहास्यतां याति यथा षण्डो फलः स्त्रियाम्।।**[४१]

चतुर्थे ध्याये प्रभुत्वस्य स्वरूपम्, प्रकारभेदाः, किंप्रभोः कुपरिणामाश्च वर्णिताः सन्ति। पञ्चमाध्याये कविः अयोग्यानां प्राबल्यम्, प्रशासनस्य शैथिल्यम्, आसुरीवुद्धेः प्रभावं, शिक्षणाभावात् वैदिकमार्गस्य लोपात् गुणहीनानां प्रेयसि ऋचिं च सम्यक् वर्णयति –

**अनुमोदयते योग्यो योग्यं न जातु युक्तधीम्।**
**चौराय रोचते चौरो न भद्रो हि महामतिः।।**
**आङ्ग्लशिक्षा सभ्यता च द्वयं संस्कतिवाधकम्।**
**दशा तस्य कथङ्कारं राष्ट्रस्य श्रेयसी भवेत्।।**[४२]

दुष्प्रवत्तेः दुर्नयस्य मूलकारणं गुणवैषम्यम् इन्द्रियचापल्यमिति निरूप्य तन्निवारणाय ध्यानमार्गमुपदिशति कविः –

**मनश्चलं मनुष्याणां यावन्न परिवर्त्तते।**
**तावच्चेष्टाशतेनापि नापराधो पचीयते।।**
**ध्यानमार्गो द्वितीयो स्ति संनिवर्त्तयितुं मनः।**
**दशान्तरमिते स्वान्ते न च तद् दुष्यति प्रिये।।**[४३]

अग्रे सप्तमे ध्याये कविध्यानफलेन कथं सिद्धिः लभ्यते, कथमखण्डानन्दलाभ इति प्रतिपादयितुं ध्यानस्य महत्त्वमेव अग्रेसारयति –

**त्यागी भवतु वा भोगी ध्यानं हिताय कल्पते।**
**भोगिनो ह्यनिवार्यं तन्मननं त्यागिनां यथा।।**
**ध्यानेन शनकैर्वुद्धिर्भावातीता हि जायते।**
**आनन्दो खण्ड आयाति प्रकर्षेण विशेषतः।।**
**भोगी भूत्वापि यो ध्याता गही भूत्वापि बोधवान्।**
**स्थितो पि विषयेष्वादौ स ऋषिर्न निबध्यते।।**
**गहस्थः कुरुतां ध्यानं गार्हस्थ्यञ्च महीयताम्।**
**एकं ध्यानञ्च योगञ्च यः पश्यति स पश्यति।।**[४४]

सुन्दरं काव्यमिदं मुद्रणत्वरावशात् खण्डितं लक्ष्यते। कुत्र श्लोकसंख्या भ्रष्टा (प. ६, श्लो. २६), क्वचिदुपर्शीर्षकाणामक्षरसौन्दर्यं भ्रष्टमथवा अध्यायसमापनसौन्दर्यम्। येन अध्यायस्य अन्तिमवाक्यमपर–

पष्ठायां गतमस्ति (२, ३, ४, ५ अध्यायानामन्तिमवाक्यम्)। तथापि दुर्नीतिनिवारणाय दढपरिकरस्यास्य काव्यस्यान्तःस्वरः –

**गतश्चौरो गतश्चौर इत्युच्चैः श्रूयते रवः।**
**न हन्त प्रतिकारो स्ति को पि क्वापि कदाचन।**[४५]

इदं चात्र भरतवाक्यम् –

**स्वदेशसभ्यतोत्कष्टा गौरवेणातिरिच्यते।**
**इति बुदध्वा सदा सेव्या सर्वैः स्वराष्ट्रकामिभिः।।**[४६]

७. **सरलसंस्कतसम्भाषकम्** - सरलसंस्कतसम्भाषणस्य अभ्यासाय भागद्वये अत्र ५३ अभ्यासाः सन्ति। सर्वे पि अभ्यासाः संवादशैल्या प्रतिपादिताः सन्ति। प्रथमे भागे साधारणसंवादाः सन्ति। यथा – मेलनं रेलनिःस्थाने, मेलनं सहपाठिन्या सह, अहं भुवनेश्वरं गत इत्यादयः। द्वितीये भागे विविधाः शास्त्रीयाः विषयाः संवादशैल्या प्रतिपादिताः सन्ति, यथा – अथातो वेदजिज्ञासा, वेदाङ्गवार्त्ता, गीता सुगीता कर्त्तव्या, रम्या रामायणी कथा, भारते भाति संस्कतिः इत्यादयः। यद्यपि ग्रन्थो यं, सरलसंस्कतस्य अभ्यासाय रचितः, प्रकाण्डः पण्डितो यं तत्र दत्तावधानो न दश्यते। सन्धिनियमाः कठोरतया अनुसताः सन्ति, कदाचित्ते प्रथमाभ्यासिनां कते विघातकाः भवेयुः। प्रथमाभ्यासादेव यथा – अतितरां कार्यरत आसम्,[४७] श्रुतो मया भवदीयो गुणगणः[४८], अङ्ग, कस्तावत्प्रसङ्गः[४९], महात्मन्, किमात्मवर्त्म[५०]। इदं प्रमाणितमत्र यत् बहुपरिश्रमेण रचिता एते अभ्यासाः सुखाभ्यासाः न सन्तीति। किन्तु संस्कताध्ययनरतानां कते अयं कश्चन उपयोगी ग्रन्थः स्यादेव।

८. **ललितलवङ्गम्** - ४१बालकाव्यानां संग्रहो यं पटलद्वयेन विभक्तः। प्रथमपटले २० काव्यानि द्वितीयपटले २१ काव्यानीह लसन्ति विविधभावभरितानि। मुख्यत एतानि काव्यानि भगत्रयेण विभाजयितुं शक्यानि–ईश्वरस्य मातभूमेर्वा स्तवनपराणि–भारतजननी, विश्वनियन्ता, हे भगवन् त्वं धन्यः, भगवान् वेत्ति, तमहं वन्दे, राष्ट्रमिदं भारतम् इत्यादीनि। निसर्गरम्यचित्रणपराणि यथा– प्रातः, चित्र–विचित्रम्, प्रकतिरचना, विचित्रसष्टिः, भूरि शीतं वर्तते, ऋतुसंपदः, निसर्गरङ्गः इत्यादीनि। बालबोधकानि उद्बोधनपराणि–पठ संस्कतम्, पुरःसर त्वम्, पठ रे वत्स,

सत्पथमनुगम्यताम्, कुरु प्रयत्नम्, इत्यादीनि। दिङ्मात्रमुदाहरणानि यथा –

**अनन्तगगनं शून्यं-शून्यं, रम्यं तदीयरूपम्।**
**स्वभावरम्यं तमसाच्छन्नं नक्तं तारापूर्णम्।।**
**शुनः शावकः बुक्कति भोः-भोः में-में कुरुते छागः।**
**ओतुः करोति म्याँउ-म्याँउ शब्दो भिन्नः-भिन्नः।**
**हे भगवन् त्वं धन्यः।।**
**नितरां चित्रा विरिञ्चि-सष्टिः**
**प्रकती राज्ञी चिरं चकास्ति।**
**स्मारं-स्मारं मदीय-चेतः**
**चञ्चति चरणे विभोरुदारे।**
**इह संसारे, काले-काले।।**[५१]

काव्यसंगेहो यं कोमलकल्पनाभिः सरलतरलभावैश्च बालानां प्रचोदनाय सर्वथा अलम्।

६. **जनतन्त्रविमर्शः** - जनतन्त्रविमर्श इत्याक्ष्यः काव्यसंग्रहः श्रीमहापात्रस्य दशमकाव्यसंग्रहो वर्तते। अत्र खण्डद्वये (३४+३५) ७० काव्यानि विलसन्ति। आमूलचूडं पठनेन ज्ञायते यत् सर्वथा सरल–सावलील–भाषया लिखितं राष्ट्रियभावपोषकमिदमत्युत्तमं काव्यं वर्तते यथा–

**यदीयमन्नं खलु भोजनं मे, सदैव जीवामि यदीयवातैः।**
**यदीयधूलिर्ननु चन्दनं मे, कथं न सेव्या जननी मया सा।।**[५२]

शीर्षकनाम्नो नुसारेण यद्यप्यत्र गणतान्त्रिकराष्ट्रस्य हेया उपादेयाश्च अंशाः अत्र समालोचनपुरस्सरं वर्णिताः सन्ति, तथापि प्रायेषु काव्येषु मातभूमेः स्तवनपरकानि जन्मभूसमर्च्चनप्रचोदकानि प्रेरकतत्त्वानि विलसन्ति। भारतवन्दना (१,२), भारतराष्ट्रमाता, मातभूमिः, देशाय देयं हृदयं मदीयम्, रक्षापुरुषः, क्षेत्रपतिः, अस्मदीया राष्ट्रमाता, जननी जन्मभूमिश्च, राष्ट्रवन्दना (१,२), सुन्दरं भारतवर्षम्, वसुधैव कुटुम्बकम् इत्यादिकाव्येषु प्रायः ३५ पष्ठासु तन्नाम काव्यस्यार्धभागे मातभूमिस्तवनमेव वर्तते। क्वचित् स एव देशभक्तिभावः पुनः पुनः आवर्तते विविधशब्दच्छटाभिः –

**यदीयधूलिः खलु चन्दनं मे**
**निःश्वास एवास्ति यदीयवातः।**

**शस्यानि यस्याः सुखभोजनं मे**
**नमामि तत्पादसहस्रपत्रम्।।**
**या जन्मनः प्रभति मां भरती धरित्री**
**मातेव पुत्रमुपतिष्ठत एव नित्यम्।**
**अङ्कीकरोति मरणादपि मां परं या**
**तन्मातभूमिचरणे शरणं प्रपद्ये।।**
**ममैव राष्ट्रीयमहत्त्वमीक्षे**
**बहिः स्वदेशादतुलं यदाहम्।**
**तदा मदीयं हृदयं प्रफुल्लं**
**भवत्यपारैरभिमानरागैः।।**
**स्वराष्ट्रसुता खलु संस्कतिर्मे**
**शिरःप्रधार्या भवतु प्रकामम्।**
**तदीयमूल्यं यदि सर्वलोका**
**अर्हन्त्यवेतुं मम भूरिभाग्यम्।।**[५३]

दूषणं सर्वथा हेयम्, वरं श्रेयः पदे–पदे, न मर्यादा न च क्रमः संस्कतभाषा, शताब्द्या आह्वानप्रभतिषु काव्येषु काव्यविषयो न तु जनतन्त्रपरको न वा तस्य विमर्शात्मकः।

**सद्भावो भारतीयानामाकुमारीहिमाचलम्।**
**वर्णधर्माविशेषेण वर्त्ततामुत्तरोत्तरम्।।**[५४]

अतः काव्यशीर्षकं मातभूमेः स्तवनपरकं चेत् अधिकं सुन्दरं भवितेति मे मतिः।

अस्य संग्रहस्य भाषा अतीव सरला, सुकोमला, स्मरणीया च वर्तते। भावानुकूलः छन्दप्रयोगः, काव्यसौष्ठवं वर्धयति। तथा चात्र भारतवन्दना, राष्ट्रवन्दना, जननी जन्मभूमिश्च रागात्मिकाः सन्तिं तदतिरिच्य अन्यत्र अनुष्टुप्–उपजाति–वसन्ततिलकानां प्रयोगः स्पहणीयो विषयानुकूलश्च वर्तते। शेषभागे संयुक्तः काव्यस्थसुभाषितसंग्रहः काव्यस्य सारं पुन उपस्थापयत्येव। मुखपष्ठमपि विषयानुकूलं स्वतन्त्रतायाः स्वर्णजयन्ती–चिह्नयुक्तं सत् भावोद्रेककारि एव। शोभनं बन्धनं सुन्दरं मुद्रणमप्यत्र मुद्रास्खलनरहितं नास्ति। कदाचित् प्रुफसंशोधनं विना मुद्रणत्वरा, टङ्कणकस्य संस्कतज्ञानाभावो वा तस्य कारणं स्यात्। नणां (प.४४), स्वार्गादपि (प.५२), चारुवकत्रम् (प.१७), स्परूपं (प.२७) इत्यादय उपशताः मुद्रात्रुटयः काव्यरसास्वादविघातकाः सन्ति।

भङ्गिभणितिवैचित्र्येण पूर्वसूरिभी रचितश्लोकानामंशतः पुनर्विन्यासो नूतनसौन्दर्यं जनयति, यदाधुनिकसमीक्षकैरन्यच्छायासौन्दर्यं कथ्यते। यथा –

**भात्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो वज्रवराटकं वा।**
**अहर्निशं मस्तक एव यस्या**
**नमाम्यहं भारतमातरं ताम्।।**
**कर्मण्येवाधिकारस्ते मत्वेति कार्यमाचरेत्।**
**विना स्वार्थं फलं तस्य राष्ट्राय भाति सर्वथा।।**
**ये नाम केचिदिह वेति वदन्ति विज्ञा...।**
**भावनेति विधातव्या राष्ट्रं रक्षति रक्षितम्।**
**तद्विना नः स्थितिः क्वास्ते**
**शिरो नास्ति शिरोव्यथा।।**
**गानं करोमि यदि मे कवितोत्तमा स्ति,**
**भानं करोमि यदि काव्यकला मनोज्ञा।**
**नत्यं करोमि यदि सा नवतां दधाति,**
**काव्यं करोमि विकरोमि परिष्करोमि।।**[५५]

आचारे वर्धते लक्ष्मीः (प.४७), अयं निजः परो वेति (प.६३), क्व हन्तः राजा स हि रामचन्द्रः (प. ३२), चञ्चूर्यते कनकवत् ननु मर्कटे हा (प.३२), शैलात् शनैः प्रवहमान–मजस्रधारं, नद्या निवारयितुमर्हति को हि मूढः (प.८७), इत्यादीनामाभाणकानां सूक्तीनां च पुनर्विन्यासेन सह समानमन्त्रः.., संगच्छध्वं.... (प. २६) श्लोकांशानां संग्रहः काव्यस्वारस्यं वर्धयति। नूतनशतकस्य नवयुगस्य आह्वानं स्वीकत्यापि कषकस्य एव जयगानं करोति कविः यो मातभूमेः पूजनं कत्वा सर्वेषां कते खाद्यं ददाति। तदेव भरतवाक्यायते अत्र–

**पोष्यतां नूतना चिन्ता नूतनं दर्शनं दिशाम्,**
**स्फूर्त्तिश्च नूतना काम्या नूतन उद्यम ऋद्धये।।**
**आयातु वैप्लविकसङ्कटमुत्कटं वा,**
**लोकः प्रयातु सुतरामथवा मगाङ्कम्।**
**यावद् धुरन्धरयुगं हललाङ्गलीषा,**
**दात्रं च हन्त मम का परिवेदना स्यात्।।**[५६]

१०. **पाश्चात्यसंस्कतम्** - संस्कताध्यापनाय रुषदेशं गतस्य श्रीमहापात्रस्य भ्रमणवत्तान्तमिदं पाश्चात्यसंस्कतमिति भागद्वयेन विभक्तं ५८+३५ विषायान् धारयति। यद्यपि यात्रावत्तसाहित्यं संस्कते स्वल्पमेव, तथापि नवकिशोरकांकरस्य यात्राविलासम्, डा. विश्वासस्य अपश्चिमे पश्चिमः श्रीमहापात्रस्य पाश्चात्यसंस्कतं च किमपि नवमेव मार्गमन्वसरन्। परिणते वयसि सुयोगं प्राप्य विमानारूढः कविः श्वेताङ्गपरिचारिकाः पश्यन् काव्यनिर्माणे प्रचोदितः। रहसि नभसि प्रयाणं कुर्वन्नपि कविः मातभूमिमोहं न त्यक्तवान्गद्ये पि पद्यप्रबन्धनम्—

**भारतमाता क्व मया त्यक्ता**
**पथिवीख्याता हा क्वाहम्।**
**मम ग्रामः क्वेदं यातम्**
**क्वे मे लोकाः कुत्राहम्।।**[५७]

ऋषराजधानीं साम्यवादिनीं मास्कोनगरीं प्राप्य कविः वाहन—भवन—यानानां साम्यं समद्धिं च दष्ट्वा जनानां संस्कतप्रीतिं च दष्ट्वा नितरां विस्मितः। रुषदेशीयानां कलासंस्कतिभ्यामाचारव्यवहाराभ्यां मुग्धः कविस्तेषां चित्रशालां कलाशालां संग्रहालयम् ऐतिहासिकस्थलानि प्राकतिकस्थलानि नौ—अश्वादिविहारस्थलानि गत्वा चारुचित्रावलीः पश्यन्, ऐतिह्यं संगह्य स्वलेखनीं व्यापारितवान् देशे—देशे प्रथा पथक् इति। भारतीयानामेकपत्नीव्रतं, पत्नीनामानुगत्यं श्रुत्वा वैदिशिका अपि विस्मिताः जाताः। छात्राणां श्रद्धाभावनां, पत्राचारं, भ्रमणसान्निध्यं, चित्राणि, संस्कतशिक्षणस्य साफल्यं, गुरुशिष्ययोः सम्बन्धं च निर्व्याजं वर्णयन् कविः उपसंहरति ग्रन्थम्।

११. **रुषियाशतकम्** - शतककाव्यमिदं मङ्गलाचरणं, परिशिष्टं तोटकचतुष्टयं विहाय इन्द्रवज्रा—उपेन्द्रवज्रा—उपजातीनां शतकं वर्तते रुषियादेशस्य गुणगणप्रख्यापकं रीतिनीतिकलासंस्कति—प्रचारकञ्च वर्तते। रुषदेशस्य संमद्धिर्यथा —

**यत्रैव भाति नगरे-नगरे समद्धि-**
**र्विज्ञानकौशलबलेन मनोज्ञरूपा।**
**किंवा वदानि रुषियाविषयस्य वार्त्तां**
**हन्तोद्यमेन च जनाः श्रियमाश्रयन्ते।।**

**अहो बत श्रीः श्रयते तिरम्यं**
**मस्कोपुरं पुष्करचुम्बि हर्म्यम्।**
**मनोज्ञमार्गा विरलाः प्रशस्ता**
**विभान्त्यहो मत्तरयानवन्तः।।**[५८]

पाश्चात्यशैल्याः सर्वोच्चशिखरे विराजमानाः, समस्तक्षेत्रे पुरुषैः स्पर्धमानाः, गौरवर्णीयाः रुषीयललनाः कामकेलिषु रतिदेव्या सहैव स्पर्धमानाः, कविलेखन्या धन्याः जाता एव –

**परस्परालिङ्गितकायमध्ये**
**वातो पि हन्तार्हति न प्रवेष्टुम्।**
**शून्यं न चाप्नोत्यवकाशलेशं**
**विद्योतते केवलमात्मभूः सः।।**
**शीते यने संसरणे च याने**
**द्वयोर्द्वयोः प्रेमकथाप्रसङ्गम्।**
**आश्लेषणोष्णं च विलोक्य शैत्यं**
**पलायते दूरत एव भीत्या।।**
**निरीक्षणेन परिलक्ष्यत एव काचित्**
**स्थानत्रये कुटिलकर्पटिका बता क्व।**
**तत् साम्बरं किमु दिगम्बर-यौवतं वा**
**सन्देह एति सहसा मनसीत्यनल्पः।।**

रुषियादेशस्य गङ्गारूपायाः वोल्गानद्याः भव्यवर्णने कविः शतमुखो भवति –

**वोल्गा नदी प्रवहतीत विशालकाया**
**या स्वीयरूपमभिदर्शयितुं प्रगल्भा।**
**सङ्गीयते च कविकर्मकथाप्रसङ्गे**
**लोकश्रुतिर्बहुमुखी रुषियाप्रदेशे।।**

कर्मनिष्ठ–वलिष्ठ–वरिष्ठ–प्रतिष्ठित–रुषिता–भिजनानामुद्यमे वसते लक्ष्मीः प्रशंसनीया एव।

**कर्तव्यकर्मणि सदा प्रतिभाति निष्ठा**
**सन्दश्यन्ते च भुवने रुषियाप्रतिष्ठा।**
**उद्योग एव सहयोगितयाभिभाति**
**यः स्पष्टमिष्टफलभाग्भवति स्वभावात्।।**[५९]

अत्र कविना रुषीयनिसर्गलक्ष्मीः, तेषामुपासकाश्च सादरं हृत्पूर्वकं स्मताः, सत्कताः पुरस्कताश्च सन्ति।

**१२.उपसंहारः** - बालकाव्यमस्य कवेरतिमधुरम्। कवेः देशभक्तिभावनया रसस्निग्धानि जातानि तस्य सुरेन्द्रसाएचरितमहाकाव्य–सुवर्णवङ्गकाव्य–रुषि–याशतकादीनि। तस्य पारम्परिकं काठिन्यं कदाचित्स्वल्पतया प्रतिफलितं तस्य असहज–गद्यलेखेषु। सरलतरलभावविन्यासः सुमधुर–रम्य–प्रकतिचित्रणं, कोमलकान्त–पदावली विलसन्ति कवेरस्य प्रतिकाव्यम्। जनजीवनस्य सहजहृदयसंवादो भवत्यत्र श्रीमहापात्रस्य काव्यसंसारे। डा. अरुणरञ्जनमहोदयस्य भाषया सहमतो यं जनस्तदुक्तिमेव उद्धरति तावत् – "Their usage even in the modern languages is very wide and they have a very close references to different experiences of life. Acharya Mohapatra as a poet of life, symbolizes the transitory preparation of the Sanskrit literature to be modern in theme and structure." [६०] निसर्गसिद्धं तस्य कवित्वं भरतवाक्यायते स्वीयाय अन्येभ्यश्च –

**हे कविप्रवर क्रियतां कविता**
**रचना भवतु छलना रहिता।**
**कलमादमतं तव संक्षरतु**
**हृदये-हृदये पुलकः स्फुरतु।।**[६१]

*संस्कतविभागः,*
*रामकष्णमिशन, आवासीयमहाविद्यालयः,*
*नरेन्द्रपुरम् कोलकाता – १०३*

**सन्दर्भाः पादटीकाश्च**

---

[१] मानससन्देशम्, प. ५, श्लो.५, ले. आचार्यदिगम्बर महापात्रः, प्रका. उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, प. १२+३८, श्लो. १८०, मूल्य– १२.००, प्र.सं. १९८८

[२] तत्रैव, चिलिका, प.७, श्लो.१०,८,५,६

[३] तत्रैव, प्रयागः, प. ६, श्लो. २–३

[४] तत्रैव, आग्रा, प. ११, श्लो. ३–४

[५] तत्रैव, दिल्ली, प. १३, श्लो. १

[६] मङ्गलश्लोकः, प. ८०, व्यस्तरागम्, लेखकः – आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३९९, कोयलनगरम्, राउलकेला, ओडिशा, ७६९०१४, प्र.सं. १९९०, प. १५+१५०, मूल्यम् – २२.००

[७] तत्रैव, प.च.

[८] तत्रैव, प. ३६, श्लो. १०

[९] तत्रैव, प. ४, श्लो.६,८

[१०] तत्रैव, प. ६–७, श्लो. ८,११

[११] तत्रैव, प. २४, श्लो. ५

[१२] तत्रैव, प. ४४–५७, श्लो. ६,११,२१,२४,४१,४२,४८,५०,५७,५६

[१३] तत्रैव, प.४, श्लो. १, प. ५८, श्लो. ५, प.७६, श्लो. २,७

[१४] तत्रैव, प.७६, श्लो. १२

[१५] तत्रैव, प. १३०, श्लो. ६

[१६] तत्रैव, प.८४, श्लो.२२

[१७] तत्रैव, प.६१,श्लो.२२, २३

[१८] प. ४७, श्लो. १४५, अद्वैतबोधविवेकः, ले. आचार्यदिगम्बरमहापात्रः, प्रका. उमेशचन्द्रमहापात्रः, ए–३९९, कोयलनगरम्, ओडिशा, प्र.सं. १९९२, प. १४+४८, मूल्यम्–२५.००

[१९] तत्रैव, पूर्व,श्लो.४२, उत्तर.श्लो. २,४

[२०] तत्रैव, उत्तर.श्लो. ६८–६९

[२१] तत्रैव, उत्तर.श्लो. ११८,११९,११३

[२२] तत्रैव, उत्तर.श्लो. १४०,१४३

[२३] तत्रैव, पूर्व.श्लो. १३१,११३,८६

[२४] तत्रैव, उत्तर.श्लो. १५०

[२५] सुवर्णवङ्गम्, १.२८, ले. आचार्यदिगम्बरमहापात्रः, प्रका. उमेशचन्द्रमहापात्रः, ए–३९९, कोयलनगरम्, ओडिशा, प्र.सं. १९९९, प. १४+४८

[२६] तत्रैव, १.३५–३६

[२७] तत्रैव, २.२८,३९

[२८] तत्रैव, ३.७,९,१३,३०,४१

[२९] तत्रैव, ४.६,५१

[३०] तत्रैव, ५.१२,२३,३२,४१

[३१] तत्रैव, २.४२,४.१७

[३२] तत्रैव, ५.४६

[३३] वेदान्तवार्तिकम्, प.३२, ले. आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, ७६९०१४, प्र.सं. १९९०, प. १५+१५०, मूल्यम् – २८.००

[३४] तत्रैव. प. २२

[३५] मङ्गलश्लोकः, दुर्नीतिपुराणम्, ले.– आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, ७६९०१४, प्र. सं. २०००, प. ८+५२, मूल्यम् – ३५.००

[३६] तत्रैव, १.२२

[३७] तत्रैव, १.२६

[३८] तत्रैव, १.३२, ३५

[३९] तत्रैव, १ अध्याये

[४०] तत्रैव, २.१०५

[४१] तत्रैव, ३.१५०,१५३

[४२] तत्रैव, ५.२०२,२२८

[४३] तत्रैव, ६.२५८,२५६

[४४] तत्रैव, ७.२८१, २८६,३१३,३१२

[४५] तत्रैव, प. ३४, श्लो. २०५

[४६] तत्रैव, प. ४०, श्लो. २४०

[४७] सरलसंस्कतसम्भाषणम्, प. १,२,३,३, ले.– आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, प्र.सं. २०००, मूल्यम् – १००

[४८] तत्रैव

[४९] तत्रैव

[५०] तत्रैव

[५१] भारतजननी,प.१,श्लो.३, प.१६, श्लो.४,प.२५, श्लो. ८, ललितलवङ्गम्, ले.– आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, ७६९०१४, प्र.सं. २००१, प.८,१०२, मूल्यम् – ७५.००

[५२] प.४,श्लो.४, मातभूमिः, जनतन्त्रविमर्शः, ले.– आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, प. १०+१०६,प्र. सं. २००२, मूल्यम् – ६०.००

[५३] तत्रैव, देशाय देयं हृदयं मदीयम्, प. ७–६, श्लो. ७,२१, लोकनायकः, प.२३, श्लो. २२–२३

[५४] तवैव, वरं श्रेयः पदे–पदे, प.६४,श्लो.८

[५५] तत्रैव, प. ३,२७,४१,४३,६१

[५६] तत्रैव, प.६६,१८

---

[५७] प.५, पाश्चात्यसंस्कतम् ले.– आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, ७६६०१४, प्र.सं. २००३, मूल्यम् – १६०.००

[५८] श्लो. ६,७, रुषियाशतकम्, ले.– आचार्यदिगम्बरमहापात्रः, प्रकाशकः –उमेशचन्द्रमहापात्रः, ए–३६६, कोयलनगरम्, राउलकेला, ओडिशा, ७६६०१४, प्र.सं. २००३, प. १८+६४, मूल्यम् – १०००

[५९] तत्रैव, श्लो. १६,१७,२४,५४,७७

[६०] Contemporary Sanskrit Writing in Orissa, by Dr. Arun Ranjan Mishra, Ed.- Prof. Radhaballabh Tripathi, Prof. Achyutananda Dash, Pub. Pratibha Prakashan, Delhi-7, 2006,P.90

[६१] भगवत्सदनम्,६, प.१०१, ललितलवङ्गम्, उपर्युक्तम्।

———ooo———